# Chidambaresha Stotra Kadamba

# ચિદમ્બરેશસ્તોત્રકદમ્બઃ

## Document Information

Text title : Chidambaresha Stotrakadamba

File name : chidambareshastotrakadambaH.itx

Category : shiva

Location : doc_shiva

Transliterated by : Muthuraman Krishnamurthy

Proofread by : Muthuraman Krishnamurthy, Aruna Narayanan

Latest update : March 31, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2023

*sanskritdocuments.org*

# ચિદમ્બરેશસ્તોત્રકદમ્બઃ

શ્રી ચિત્સભેશાયમઙ્ગલમ્ ॥

અયઙ્કિલપટતાં શ્ૃણ્વતાઞ્ચધર્માર્થ
કામમોક્ષચતુર્વિધપુરુષાર્થસિદ્ધિપ્રદઃ સ્તોત્ર કદમ્બઃ ।
સોમયાજિભિઃ બ્રહ્મશ્રી ત। અપ્પાસ્વામી દીક્ષિતૈઃ સંશોધ્ય
શ્રી ચિદમ્બરનગરવિરાજમાન શ્રી જ્ઞાનસમ્બન્ધવિલાસમુદ્રણાલયે
મુદ્રાખ્ય પ્રકતીક્રિતોવિજયતેતરાં
અક્ષય વર્ષ

અથ સમ્પત્પ્રદસ્તવઃ ॥

પ્રત્યૂહદ્ધ્વાન્તચણ્ડાંશુઃ પ્રત્યૂહારણ્યપાવકઃ ।
પ્રત્યૂહસિહ્મશરભઃ પાતુ નઃ પાર્વતીસુતઃ ॥

ચિત્સભાનાયકં વન્દે ચિન્તાધિકફલપ્રદમ્ ।
અપર્ણાસ્વર્ણ કુમ્ભાભ કુચાશ્લિષ્ટકલેવરમ્ ॥ ૧॥

વિરાડ્ઢૃદય પદ્મસ્થત્રિકોણેશિવયાસહ ।
સયોનઃ કુરુતેલાસ્યમષ્ટલક્ષ્મીઃ પ્રયચ્છતુ ॥ ૨॥

શ્રુતિસ્તમ્ભાન્તરેચક્ર યુગ્મેગિરિજયાસહ ।
સયોનઃ કુરુતેલાસ્યમષ્ટલક્ષ્મીઃ પ્રયચ્છતુ ॥ ૩॥

શિવકામીકુચામ્ભોજ સવ્યભાગવિરાજિતઃ ।
સયોનઃ કુરુતેલાસ્યમષ્ટલક્ષ્મીઃ પ્રયચ્છતુ ॥ ૪॥

કરસ્થ ડમરુધ્વાન પરિષ્કૃતરવાગમઃ ।
સયોનઃ કુરુતેલાસ્યમષ્ટલક્ષ્મીઃ પ્રયચ્છતુ ॥ ૫॥

નારદબ્રહ્મ ગોવિન્દ વીણાતાલ મૃદઙ્ગકૈઃ ।
સયોનઃ કુરુતેલાસ્યમષ્ટલક્ષ્મીઃ પ્રયચ્છતુ ॥ ૬॥

જૈમિનિ વ્યાઘ્રપાચ્છેષસ્તુ તિસ્મેરમુખામ્બુજઃ ।
સયોનઃ કુરુતેલાસ્યમષ્ટલક્ષ્મીઃ પ્રયચ્છતુ ॥ ૭॥

તિલ્વવિપ્રૈસ્ત્રયી માર્ગ પૂજિતાઙ્ઘ્રિસરોરુહઃ
સયોનઃ કુરુતેલાસ્યમષ્ટલક્ષ્મીઃ પ્રયચ્છતુ ॥ ૮॥

મન્ત્રનૂપુર પદ્પદ્મ ઝણજ્ઝણિ તદિન્મુખઃ ।
સયોનઃ કુરુતેલાસ્યમષ્ટલક્ષ્મીઃ પ્રયચ્છતુ ॥ ૯॥

સમ્પત્પ્રદમિદં સ્તોત્રં પ્રાતરુત્થાય યઃ પઠેત્ ।
અચલાં શ્રિયમાપ્નોતિ નટરાજ પ્રસાદતઃ ॥ ૧૦॥

ઇતિ સમ્પ્રત્પ્રદસ્તવઃ ।

અથ અષ્ટમૂર્તિ સ્તુતિઃ ।
ક્ષિતિમૂર્તે નમસ્તુભ્યં જાતા નિક્ષિતિ કર્મસુ ।
મયિતિષ્ઠન્તિ પાપાનિ તાનિ નાશય શઙ્કર ॥ ૧૧॥

જલમૂર્તે નમસ્તુભ્યં જાતા નિજલકર્મસુ ।
મયિતિષ્ઠન્તિ પાપાનિ તાનિ નાશય શઙ્કર ॥ ૧૨॥

વહ્નિમૂર્તે નમસ્તુભ્યં જાતા નિવહ્નિ કર્મસુ ।
મયિતિષ્ઠન્તિ પાપાનિ તાનિ નાશય શઙ્કર ॥ ૧૩॥

વાયુમૂર્તે નમસ્તુભ્યં જાતા નિસ્પર્શ કર્મસુ ।
મયિતિષ્ઠન્તિ પાપાનિ તાનિ નાશય શઙ્કર ॥ ૧૪॥

વ્યોમમૂર્તે નમસ્તુભ્યં જાતા નિવ્યોમ કર્મસુ ।
મયિતિષ્ઠન્તિ પાપાનિ તાનિ નાશય શઙ્કર ॥ ૧૫॥

ચન્દ્રમૂર્તે નમસ્તુભ્યં જાતા નિસ્વાન્ત કર્મસુ ।
મયિતિષ્ઠન્તિ પાપાનિ તાનિ નાશય શઙ્કર ॥ ૧૬॥

સૂર્યમૂર્તે નમસ્તુભ્યં જાતા નિદૃશ્ય કર્મસુ ।
મયિતિષ્ઠન્તિ પાપાનિ તાનિ નાશય શઙ્કર ॥ ૧૭॥

યષ્ટ્રમૂર્તે નમસ્તુભ્યં જાતા નિયમ્ય કર્મસુ ।
મયિતિષ્ઠન્તિ પાપાનિ તાનિ નાશય શઙ્કર ॥ ૧૮॥

અષ્ટમૂર્તેસ્સ્તુતિમિમાં યઃ પઠેચ્છિવસન્નિધૌ ।
કિલ્બિષાદખિલાન્મુક્તસ્સ્વર્ગં મોક્ષગ્ચવિન્દતિ ॥ ૧૯॥

ઇત્યષ્ટમૂર્તિ સ્તુતિઃ ॥

અથ ષડક્ષરસ્તોત્રમ્ ॥

“ૐ નમઃ શિવાય ।”
ૐઅક્ષર નમસ્તુભ્યં પરબ્રહ્મ નિકેતન ।
અનાયાસેન મે મુક્તિં પ્રયચ્છ શ્રી સભાપતે ॥ ૨૧॥

નટરાજ નમસ્તુભ્યં નગરાજ નિકેતન ।
અનાયાસેન મે મુક્તિં પ્રયચ્છ શ્રી સભાપતે ॥ ૨૨॥

મહાદેવ નમસ્તુભ્યં માર્તાણ્ડ હૃદિસંસ્થિત ।
અનાયાસેન મે મુક્તિં પ્રયચ્છ શ્રી સભાપતે ॥ ૨૩॥

શિતિકણ્ઠ નમસ્તુભ્યં શિવકામિ મનોહર ।
અનાયાસેન મે મુક્તિં પ્રયચ્છ શ્રી સભાપતે ॥ ૨૪॥

વામદેવ નમસ્તુભ્યં વાઞ્છિતાર્થ પ્રદપ્રભો ।
અનાયાસેન મે મુક્તિં પ્રયચ્છ શ્રી સભાપતે ॥ ૨૫॥

યજમાન નમસ્તુભ્યં યજ્ઞમૂર્તે અભયપ્રદ ।
અનાયાસેન મે મુક્તિં પ્રયચ્છ શ્રી સભાપતે ॥

ષડક્ષરમિદં સ્તોત્રં યઃ પઠેચ્છિવસન્નિધૌ ।
તસ્ય મૃત્યુભયં નાસ્તિ ભવેત્ કૈવલ્યમુત્તમમ્ ॥ ૨૬॥

ઇતિ ષડક્ષરસ્તોત્રમ્ ॥

ઇન્દ્રિયાણાં પતીન્નૌમિ તત્તદ્દોષ નિવૃત્તયે ।
દિગ્વાતાર્ક પ્રચતો અશ્વિ વહ્નીન્દ્રોપેન્દ્ર મૃત્યુકાન્ ॥ ૨૭॥

મનસેમુષ્યહઙ્કાર ચિત્તમાયાધિપાંસ્તથા ।
ચન્દ્રં બૃહસ્પતિં રુદ્રં ક્ષેત્રઞ્ચ મહેશ્વરમ્ ।
ઇતિ ઇન્દ્રિયજનિત દોષ નિવૃત્ત્યર્થં તત્તદધિષ્ઠાન દેવાનાં વન્દનમ્ ॥ ૨૮॥

અથ રક્ષાસ્તવઃ
પુરસ્તાત્ પાતુ મનં વજ્રી વહ્નિકોણેતુ શક્તિભૃત્ ।
યામ્યામદણ્ડધરઃ પાતુ ખડ્ગી રક્ષતુ નૈરૃતે ॥ ૨૯॥

વારુણ્યાં વરુણઃ પાતુ વાયવ્યાન્દિશિ મારુતઃ ।

ઉત્તરેધનદઃ પાતુ ઐશાન્યાં પાતુ શૂલભૃત્ ॥ ૩૦॥

ઊર્ધ્વં ચતુર્મુખઃ પાતુ ચાધસ્તાત્ પાતુ શાર્ઙ્ગભૃત્ ।
મૃત્યુઞ્જય કૃપાસિન્ધો નીલકણ્ઠ મહેશ્વર । ૩૧॥

સદા સર્વત્ર માં રક્ષ ચિત્સભેશ નમોઽસ્તુતે ।
શિવકામિ નમસ્તુભ્યં ચિન્તિતાર્થવરપ્રદે ॥ ૩૨॥

મયિસ્થમખિલં ક્લેશમાશુ નાશય શઙ્કરિ ।
ઇતિ રક્ષાસ્તવઃ ॥

ગર્ભવાસાં શિશુત્વઞ્ચ કષ્ટયૌવન વાર્ધકે ।
મૃત્યુઞ્જયઞ્ચ સંહર્તું ધીમહિત્વાં સભાપતે ॥ ૩૩॥

ઇતિ ધ્યાન શ્લોકઃ

હૃદન્તે પરમે વ્યોમન્ લાસ્યમાનં મહદ્દૃયમ્ ।
યઃ પશ્યતિપરં બ્રહ્મકૈવલ્યં પદમશ્નુતે ॥ ૩૪॥

કૈવલ્યં પદમશ્નુતે કૈવલ્યં પદશ્નુત ઇતિ ।
ઇતિ પ્રાચીન પુસ્તકે દહરવિદ્યાખણ્ડે પ્રતિપાદિતમ્ ॥

હરિઃ ૐ
મઙ્ગલં દિશતુમે વિનાયકો મઙ્ગલં દિશતુમે ષડાનનઃ ।
મઙ્ગલં દિશતુમે સરસ્વતી મઙ્ગલં દિશતુમે ચતુર્મુખઃ ॥

મઙ્ગલં દિશતુમે હરિપ્રિયા મઙ્ગલં દિશતુમે ચતુર્ભુજઃ ।
મઙ્ગલં દિશતુમે સભેશ્વરી મઙ્ગલં દિશતુમે સભેશ્વરઃ ॥

શુભં

Encoded from Tamil Grantha lipi book
by Muthuraman Krishnamurthy

Proofread by Muthuraman Krishnamurthy, Aruna Narayanan

*Chidambaresha Stotra Kadamba*

pdf was typeset on April 1, 2023

Please send corrections to *sanskrit@cheerful.com*